Roll No..........................

Signature of Invigilator .........

Paper Code

BV-504

# पतंजलि विश्वविद्यालय

## University of Patanjali

## Examination December-2022

### बी.ए. व्याकरण, पंचमसत्रम्

### व्याकरणम्, चतुर्थपत्रम्

### वैदिकसाहित्यम्

समयः - होरात्रयम् पूर्णाङ्काः 70

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

(खण्ड -क)

**पृष्टेषु पञ्चसु त्रयः प्रश्नाः समाधेयाः।** (15 x3 =45)

1. पृष्टेषु चतुर्षु त्रयाणां मन्त्राणां व्याख्यानं कुर्वन्तु -

(क) ब्रह्मचारीष्णंश्चरति रोदसी उभे तस्मिन् देवाः समनसो भवन्ति।

स दा धार पृथिवीं दिवं च स आचार्यं तपसा पिपर्ति।।

(ख) आचार्यो मृत्युर्वरुणः सोम ओषधयः पयः।

जीमूता आसन्त्सत्वानस्तैरिदं स्वराभृतम्।।

(ग) आचार्यो ब्रह्मचारी ब्रह्मचारी प्रजापतिः।

प्रजापतिर्विराजति विराडिन्द्रोऽभवद्वशी।।

(घ) ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति।

आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते।।

2. पदार्थभेदान् लिखित्वा तेषु द्रव्यविभागं सविस्तरेण वर्णयन्तु।

3. पृष्टेषु चतुर्षु त्रयाणां श्लोकानामर्थं लिखन्तु।

क) शुभाशुभफलं कर्म मनोवाग्देहसम्भवम्।

कर्मजा गतयो नृणामुत्तमाधममध्यमः।।

(ख) तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः।

दशलक्षणयुक्तस्य मनो विद्यात्प्रवर्तकम्।।

(ग) परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम्।
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम्।।

(घ) पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः।
असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्।।

4. प्रश्नोपनिषदः कांश्च त्रीन् मान्त्रान् लिखित्वा तेषां विस्तरेण व्याख्या करणीया।

5. प्रश्नपत्राद् भिन्नान् मनुस्मृतेः पञ्चश्लोकान् लिखित्वा तेषां पदच्छेदविभक्तिसमासं दर्शयन्तु।

## (खण्ड -ख)

**पृष्टेषु अष्टसु पञ्च प्रश्नाः समाधेयाः।** (5 x5 =25)

6. अनुमानं कतिविधं व्याख्या कुर्वन्तु।

7. रूपरसगन्धस्पर्शानां गुणानां लक्षणानां भेदानां च वर्णनं कुरु।

8. ब्रह्मचर्यसूक्तस्य केचन पञ्च मन्त्रा लेखनीयाः।

9. मनुस्मृतेः स्मृताः पञ्चश्लोका लेखनीयाः।

10. प्रदत्तमन्त्राणां ऋषिदेवताछन्दोज्ञापनं कुरु।

(क) ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्।
अनड्वान् ब्रह्मचर्येणाश्वो घासं जिगीर्षति।।

(ख) रमां भूमिं पृथिवीं ब्रह्मचारी भिक्षामाजभार प्रथमो दिवं च।
ते रक्षति तपसा ब्रह्मचारी तस्मिन्देवाः संमनसो भवन्ति।।

(ग) आचार्यो मृत्युर्वरुणः सोम ओषधयः पयः।
जीमूता आसन्त्सत्वानस्तैरिदं स्वराभृतम्।।

(घ) पृथक्सर्वे प्राजापत्याः प्राणानात्मसु बिभ्रति।
तान् सर्वान् ब्रह्म रक्षति ब्रह्मचारिण्याभृतम्।।

(ङ) चक्षु श्रोत्रं यशो अस्मासु धेह्यन्ने रेतो लोहितमुदरम्।।

11. परत्व-अपरत्व गुरुत्वद्रवत्वशब्दस्य लक्षणं भेदं च लिखन्तु।

12. अस्य मन्त्रस्य व्याख्यां कुरु -
विश्वरूपं हरिणं जातवेदसं पारायणं ज्योतिरेकं तपन्तम्।
सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः।।

13. उपनिषदमनुसृत्य प्राणस्य स्तुतिं कुर्वन्तु।

---------------x---------------